माणम् "गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान्।
पद्मरागस्तुलयति यथापूर्वं महागुणः। क्रोष्टुकोल
फलाकारो द्वादशाष्टाब्धिगुञ्जकान्। पद्मरागस्तुलयति
यथापूर्वं महागुणः। वदरीफलतुल्यो यः स्वर्दिग्-
वसुमाषकः। तथा धात्रीफलत्रिंशद्विंशतिद्व्यष्टमा-
षकः। तथाम्रफलतुल्यो यो वह्निपञ्चैकमाषकः।
ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः। विल्वीफल-
समाकारो वसुषड्दशतोलकः। अतःपरं प्रमाणेन
मानेन च न लभ्यते। यदि लभ्येत पुण्येन तदा सिद्धि-
मवाप्नुयात्। केचिच्चारुतराः सन्ति जातीनां प्रति-
रूपकाः। विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत्।
कलसपुरोद्भवसिंहलतुम्बुरुदेशोत्थमुक्तमालीयाः। श्री-
पर्णिकायाः सदृशा विजातयः पद्मरागाणाम्। तुषोप-
सर्गात् कलशाभिधानमाताम्रभावादपि तुम्बुरोत्थम्।
काष्ण्यात्तथा सिंहलदेशजातं मुक्ताभिधानं नभसः स्वभा-
वात्। श्रीपर्णकं दीप्तिनिराकृतित्वाद्विजातिलिङ्गा-
श्रय एष भेदः"। तथा "स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सर्वजन्यम्। यः श्यामिकां पुष्यति
पद्मरागो यो वा तुषाणामिव चूर्णमध्यः। स्नेहप्रदिग्धो
न च यो विभाति यो वा प्रमृष्टः प्रजहाति दीप्तिम्।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां यः कालिकां पार्श्वगतां
बिभर्त्ति। संस्थाप्य चोत्क्षेपणानुवृत्तिं बिभर्त्ति यः
सर्वगुणानतीव। तुल्यप्रमाणस्य च तुल्यजाते यो वा
गुरुत्वेन भवेन्न तुल्यः। प्राप्यापि रत्नाकरजां स्वजातिं
त्यजेत् गुरुत्वेन गुणेन विद्वान्। अप्रणश्यति सन्देहे
शिलायां परिघर्षयेत्। घृष्टो योऽत्यन्तशोभावान् परि-
माणं न मुञ्चति। स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये
विजातयः। स्वजातकसमुत्थेन विलिखेद्वा परस्परम्।
वज्रं वा कुरुविन्दं वा विमुच्यान्योन्यकेन चेत्। न शक्यं
लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः। जात्यस्य सर्वेऽपि
मणेर्न जातु विजातयः कान्तिसमानवर्णाः। तथापि
नानाकरणार्थमेवं भेदप्रकारः परयोः प्रदिष्टः। गुणोप-
पन्नेन सहावबद्धो मणिस्तु धार्य्यो विगुणेन जात्यः। न
कौस्तुभेनापि सहावबद्धं विद्वान् विजातिं बिभृयात्
कदाचित्। चण्डाल एकोऽपि यथा द्विजातीन् समेत्य
भूरीनपहन्त्ययत्नात्। तथा मणीन् भूरिगुणोपपन्नान्
शक्नोति विद्रावयितुं विजातः"। तस्य मूल्यम् "बाला-
र्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम्। तत्र कान्ति-
विभागेन छायाभागं विनिर्दिशेत्। वज्रस्य यत्तण्डुल-
संख्ययोक्तं मूल्यं समुन्मेपितगौरवस्य। तत् पद्मरागस्य
गुणान्वितस्य स्यान्माषकाख्यातुलितस्य मूल्यम्। यन्मूल्यं
पद्मरागस्य सगुणस्य प्रकीर्त्तितम्। तावन्मूल्यं तथा
शुद्धे कुरुविन्दे विधीयते। सगुणे कुरुविन्दे च याव-
न्मूल्यं प्रकीर्त्तितम्। तावन्मूल्यं चतुर्थांशहीनं स्याद्
सुगन्धिके। यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः।
तावन्मूल्यं चतुर्थांशात् हीयते शूद्रजन्मनि। पद्मरागः
पलं यस्तु धत्ते लाक्षारसप्रभः। कार्षापणसहस्राणि
त्रिंशन्मूल्यं लभेत सः। इन्द्रनीलकसङ्काशः कर्षत्रय
धृतो मणिः। द्वाविंशतिसहस्राणां तस्य मूल्यं विनि-
र्दिशेत्। एको नोनूयते यस्तु जवाकुसुमसन्निभः।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश। बालादित्य
द्युतिनिभः कर्षं यस्तु प्रतुल्यते। कार्षापणशतानान्तु
मूल्यं सद्भिः प्रकीर्त्तितम्। यस्तु दाड़िमपुष्पाभः कर्षा-
र्द्धेन तु सम्मितः। कार्षापणशतानान्तु विंशतिं मूल्य-
मादिशेत्। चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम्। द्विमाषको
यस्तु गुणैः सर्वैरेव समन्वितः। तस्य मूल्यं विधातव्यं
द्विशतं तत्त्ववेदिभिः। माषकैकमितो यस्तु पद्मरागो
गुणान्वितः। शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः।
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः। स्वर्ण-
द्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत्। कार्षापणः समा-
ख्यातः पुराणद्वयसम्मितः। अन्ये कुसुम्भपानीयमञ्जि-
ष्ठोदकसन्निभाः। काषाया इति विख्याताः स्फटिक-
प्रभवाश्च ते। तेषां दोषान् गुणान् वापि पद्मराग-
वदादिशेत्। मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा।
ब्रह्मक्षत्रियवैश्यान्त्याश्चतुर्धा ये प्रकीर्त्तिताः। चतुर्विधै-
र्नृपतिभिर्धार्य्या सम्पत्तिहेतवे। अतोऽन्यथा धृतः
कुर्य्याद्रोगशोकभयक्षयम्" अत्र तस्य क्लीवत्वमप्युक्तम्।

**पद्मरेखा** स्त्री पद्माकारा रेखा शा०त०। हस्तस्थितपद्मा-
काररेखायाम्।

**पद्मलाञ्छन** पु० पद्मं विष्णुकमलं वा लाञ्छनमस्य। १ब्र-
ह्मणि २सूर्य्ये ३कुबेरे ४नृपे च मेदि० ५तारायां
६लक्ष्म्यां ७सरस्वत्यां च स्त्री मेदि० ८पद्मरेखायुक्ते त्रि०।

**पद्मवर्णक** त्रि० पद्मस्येव वर्णोऽस्य कप्। १कमलतुल्यवर्ण०
युक्ते। पद्मं वर्णो वर्णनं यस्य कप्। २पुष्करमूले जटा०।

**पद्मवासा** स्त्री पद्मं वासोऽस्याः। १पद्मालयायां २लक्ष्म्यां